National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2024; 1(55): 216-219
© 2024 NJHSR
www.sanskritarticle.com

**Dr. Lokeshwar. K.C.S**
Assistant Professor,
National Sanskrit University,
Tirupati.

**Correspondence:**
**Dr. Lokeshwar. K.C.S**
Assistant Professor,
National Sanskrit University,
Tirupati.

# "योगदर्शनस्य इतिहासः, सैद्धान्तिकसन्दर्भः च वैदिकपरम्परायाम्"

**(The History and Philosophical Context of Yoga in the Vedic Tradition)**

**Dr. Lokeshwar. K.C.S**

**सारांशः**

अत्र प्रदत्ते विषयसारं वेदानां अनादित्वं, पुरुषार्थविभागः, मोक्षसाधनानि, योगदर्शनपरम्परा च संक्षेपेण विवेच्यते। वेदाः सृष्टिसाधकाः च नारायणेन प्रदत्ताः इति प्रतिपादितम्। पुरुषस्य आयुषः धर्मार्थकाममोक्षे च विभागः स्पष्टः। मोक्षसाधनानि भक्तिज्ञानवैराग्यत्रयी रूपेण विवक्षितानि युगेषु भिन्नरूपेण प्रदर्शितानि। योगदर्शनस्य प्राचीनता, हिरण्यगर्भः योगवक्ता इति तत्त्वपरिचयः, ज्ञानयोगकर्मयोगयोः द्वैव मार्गयोः विषदविवरणं च दत्तम्। पतञ्जलिरचितयोगसूत्रस्य महत्त्वं तथा तस्य भाष्यपरम्परा अपि संक्षेपे निर्दिष्टा।

**विषयः**

अन्तरायतिमिरोपशान्तये शान्तपावननमचिन्त्यवैभवम्।
तं नरं विपुलकुञ्जराननं मन्महे किमपि तुण्डिलं महः।
यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै।
तं ह देवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्ये।।

**इत्यस्मात् श्रुतेः द्वौ प्रमुखौ विषयौ अवगम्येते।**

1. **वेदाः ब्रह्मणः उत्पत्तेः समनन्तरम् एव विष्णुना तस्मै दत्ताः।** अत्र स्पष्टं प्रतिपाद्यते यत् मुमुक्षुः नारायणं शरणं प्रपद्येत इति।
2. **वेदाः एव जगतः सृष्टिहेतवः।** लोकस्य प्रवृत्तिः च निवृत्तिः च वेदादेव भूत्वा, वेदेषु एव शास्त्रेषु स्पष्टतया प्रतिपादिता अस्ति।

वेदाः, वेदाङ्गानि, उपनिषदः इत्यादयः सर्वे अपि वैदिकग्रन्थाः वेदवाङ्मयरूपेण ग्राह्याः।

यद्यपि आधुनिकविद्वांसः वेदानां कालनिर्णयाय विविधं यत्नं कुर्वन्ति — यथा **"ऋग्वेदस्य अयं मण्डलः प्राचीनः, दशमः मण्डलः तु नवीनः"** इत्यादि कल्पनाः कुर्वन्ति — तथापि भारतीयपरम्परायां स्थिताः विद्वांसः वेदानां **अनादित्वं अपौरुषेयत्वं च** अङ्गीकुर्वन्ति।

**पुरुषार्थः**

**धर्मः, अर्थः, कामः, मोक्षः इति चत्वारः एव पुरुषार्थाः शास्त्रेषु दृष्टाः।**

**"शतायुर्वै पुरुषः"** इति वचनात् धर्मशास्त्रे पुरुषस्य सम्पूर्णम् आयुः शतवर्षपर्यन्तम् अङ्गीकृतम्। तद् आयुः चतुर्धा विभक्तम्—

1. **प्रथमे चतुर्थांशे** विद्याध्ययनम्,
2. **द्वितीये चतुर्थांशे** अर्थोपार्जनम्, विवाहः, अपत्योत्पादनं च,
3. **तृतीये चतुर्थांशे** सपत्नीकः वा पत्नीविहीनः वा धर्मकार्येषु तपसि च प्रवृत्तिः,
4. **चतुर्थे चतुर्थांशे** परिव्राजकवृत्तिः।

एवं आयुषः विभागः अपि धर्मशास्त्रेषु निरूपितः।

**तथापि, एषः विभागः पुरुषार्थानां प्रयोजनाय न स्यात्**, यतः **केनापि एकेनैव पुरुषार्थेन सम्पूर्णं जीवनं यापयितुं अशक्यमेव**। अतः, **सर्वेषु आयुविभागेषु सर्वेषां पुरुषार्थानां अपेक्षा अनिवार्या एव।**

**मोक्षसाधनानि –**

पुराणेषु शास्त्रेषु च भक्तिः ज्ञानं वैराग्यमिति त्रीणि मोक्षसाधनानि उपदिष्टानि। **श्रीमद्भागवते प्रथमस्कन्दे श्रीशुकदेवः परीक्षिताय मोक्षमार्गं प्रतिपादितवान्। विभिन्न युगेषु विभिन्नाः मोक्षोपायाः प्रमुखतया स्वीक्रियन्ते।**

**चत्वारः युगाः** — कृत, त्रेता, द्वापर, कलिः — **येषु मोक्षसाधनं कालानुसारं भिन्नं दृश्यते।**

- **कृतयुगे** सत्यमेव प्रमुखं, तत्र **विग्रहपूजा नासीत्**, सर्वे सत्यनिष्ठाः आसन्।
- **त्रेतायां** सत्यस्य अंशः लुप्तः, अतः **तपः** प्रमुखं मोक्षसाधनम्।
- **द्वापरे** यज्ञादिकाः वैदिकक्रियाः प्राधान्यं प्राप्नुवन्।
- **कलियुगे केशवकीर्तनं, दानं**, च भक्तिमार्गः एव मोक्षसाधनरूपेण स्वीक्रियते।

**भक्ताः मन्यन्ते** यत्, मूर्तिपूजया मनः स्थिरं भवति, ध्यानं च सुलभं भवति। अतः **भक्तिः** कलियुगे मुख्यतमः मोक्षमार्गः इति।

**ज्ञान** = "ज्ञा-अवबोधने" इत्यस्मात् धातोः निष्पन्नः, यः परमात्मा एव सर्वस्य ज्ञेयः इति दृढबुद्ध्या उत्पन्नः अवबोधः।

**वैराग्यं** = रागरहितता। रागः अर्थात् प्रीतिः; तस्य अभावः विरागः, तस्य परिणामरूपं वैराग्यम्।

**ज्ञानं सहजम्, वैराग्यं तु अनुभवजन्यं** — इति तयोः भेदः।

**यथा यथा विपर्येति लोकतन्त्रमसारवत्।**
**तथा तथा विरागोत्र जायते नात्रसंशयः**[1]।।

**ज्ञान, वैराग्य, भक्ति — एतेषां कार्यकारणभावः परस्परं अस्ति।**

- ज्ञानात् वैराग्यं, वैराग्याद् भक्तिः, भक्तेः प्रसादात् मोक्षः।
- **क्वचित् ज्ञानात् भक्ति, क्वचित् वयः-परिणामात् वैराग्यं**, ततो भक्तिः इति मार्गाः दृश्यन्ते।

**अर्थकामेष्वसक्तानां कर्मज्ञानं विधीयते।**
**धर्मं जिज्ञासमानानां प्रमाणं परमं श्रुतिः**[2]।।
**केवलकर्ममार्गः मोक्षसाधनाय न पर्याप्तः।**

**उदाहरणम्** — प्राचीनबर्हिः नाम चक्रवर्ती, यज्ञकर्मे परायणः, मोक्षं न प्राप। तस्मै **नारदः भक्तिमार्गम् उपदिशत्**। एषः संवादः श्रीमद्भागवते तृतीयस्कन्दे पञ्चविंशाध्याये विस्तरेण वर्णितः।

**योगदर्शनपरम्परा**

"युज समाधौ" इत्यस्मात् दिवादिगणीय "युज्" धातोः घञ् प्रत्यये कृते "योग" इत्यस्य शब्दस्य निष्पत्तिः भवति। अत्र योगशब्दस्य अर्थः 'समाधि' इति गृह्यते। अन्यः अपि धातुः अस्ति — "युजिर् योगे" इति रुधादिगणीयः, तस्मात् अपि घञ् प्रत्ययेन "योग" इत्येव शब्दः सिध्यति, परन्तु तस्य अर्थः 'संयोगः' इति भवति। अतः "योगः" इत्यस्य मुख्यतः द्वे व्युत्पत्तयः स्तः — एकः "युज समाधौ" इत्यस्मात्, यस्य अर्थः समाधिः; द्वितीयः "युजिर् योगे" इत्यस्मात्, यस्य अर्थः संयोगः। तथापि, योगशास्त्रे प्रायः 'योग' इत्यस्य प्रयोगः समाध्यर्थक एव दृश्यते।

योगदर्शनं तु अत्यन्तं प्राचीनमिति निर्विवादम्। कस्मिन् काले योगदर्शनस्य प्रारम्भो जात इति प्रायः वक्तुमशक्यम्। योगस्य वर्णनं सर्वप्रथमं तु वैदिकसंहितासु उपलभ्यते। कासुचित् उपनिषत्सु अपि योगस्य लक्षणानि, अङ्गानि, प्रक्रिया च वर्णिता। आचार्यस्य बलदेव-उपाध्यायस्य मतानुसारं एकविंशतिः योगप्रतिपादिकाः उपनिषदः सन्ति।

भारतीयशास्त्रपरम्परानुसारं तु इदं ज्ञायते यत् हिरण्यगर्भ एव योगस्य आदिप्रवक्ता। तत्र प्रमाणत्वेन **हिरण्यगर्भो योगस्य वेत्ता नान्यः पुरातनः**[3] इति महाभारतवचनं महर्षिः याज्ञवल्क्यः उद्धरति। तेन हिरण्यगर्भ एव योगस्य प्रथमः प्रवक्ता इति ज्ञायते। श्रीमद्भागवतस्य पञ्चमस्कन्धेऽपि इत्थं दृश्यते-

**इदं हि योगेश्वर योगनैपुणं हिरण्यगर्भो भगवान् जगाद यत्।**
**यदन्तकाले त्वयि निर्गुणे मनो भक्त्या दधितोज्झितदुष्कलेवरः॥**[4]

अनेन च हिरण्यगर्भ एव प्रथमतया योगस्य प्रवचनकर्ता इति ज्ञायते। इदानीं प्रश्नः कोऽयं हिरण्यगर्भः। तत्र केचित् मन्यन्ते कपिलाचार्य एव हिरण्यगर्भ इति। उक्तं हि योगदर्शनव्याख्यारम्भे भास्वतीकारः **इहं खलु भगवान् हिरण्यगर्भो योगस्यादिमो वक्ता स्मर्यते च हिरण्यगर्भो योगस्य वक्ता नान्यः पुरातनः**[5] इति। हिरण्यगर्भ कपिलस्य नामान्तरमिति केचन। उक्तं हि-

**विद्यासहायवन्तं च आदित्यस्थं समाहितम्।**
**कपिलं प्राहुराचार्याः सांख्यनिश्चितनिश्चयाः**
**हिरण्यगर्भो भगवानेष छन्दसि सुष्टुतः॥**[6]

हिरण्यगर्भशब्दस्य व्युत्पत्तिः एवं भवति- हिरण्यम् अत्युज्ज्वलं प्रकाशशीलं ज्ञानं गर्भः अन्तःसारः यस्य स हिरण्यगर्भः। कपिलमहर्षिरपि धर्मज्ञानतत्त्वानाम् आकरत्वात् सर्वैः हिरण्यगर्भत्वेन पूज्यते। एवं कपिलमहर्षेः हिरण्यगर्भत्वात् स एव योगस्य आदिवक्ता इति केषाञ्चित् मतम्।

इतरे केचन हिरण्यगर्भो नाम चतुर्मुखः ब्रह्मा इति मन्यन्ते, तेनैव सर्गादौ ऋषिभ्यः योगः उपदिष्टः इति अस्य प्रमाणत्वेन वायुपुराणस्य कश्चित् श्लोकं ते उदाहरन्ति-

**हिरण्यगर्भो द्युतिमान् य एष छन्दसि स्तुतः।**
**योगैः सम्पूज्यते नित्यं स च लोको विभुः स्मृतः॥**[7]

छन्दसि नाम वेदेषु हिरण्यगर्भत्वेन चतुर्मुखः ब्रह्मा सृष्टिकर्ता स्तूयते। हिरण्यगर्भः समवर्तताग्रे[8] इत्यादीनि वेदवचनानि तत्र प्रमाणानि।

चतुर्मुखब्रह्मणः प्रजापतेर्वा हिरण्यगर्भशब्देन तु व्यवहारो विद्यते। तथाहि अमरकोशे-

**ब्रह्मात्मभूः सुरज्येष्ठः परमेष्ठी पितामहः।**

**हिरण्यगर्भो लोकेशः स्वयम्भूश्चतुराननः॥**[9]

अयमेव आदिदेवः सृष्टिकर्ता ब्रह्मा सृष्टेः पूर्वमासीत् इत्यपि युज्यते एव। इतरे प्राणिनः स्वधर्माधर्माकारणात् जायन्ते किन्तु ब्रह्मा न तथा। ब्रह्मा तु स्वयमेव स्वातन्त्र्येण अभिव्यक्तः। स्मर्यते हि मनुसंहितादिषु-

**योऽसावतीन्द्रियोऽग्राह्यः सूक्ष्मोऽव्यक्तः सनातनः।**

**सर्वभूतमयोऽचिन्त्यः स एव स्वयमुद्बभौ॥**[10]

एतादृशस्य ब्रह्मणः विद्योपदेशः मुण्डकोपनिषदि श्रूयते। तथाहि-

**ब्रह्मा देवानां प्रथमः सम्बभूव विश्वस्य कर्ता भुवनस्य गोप्ता।**

**स ब्रह्मविद्यां सर्वविद्याप्रतिष्ठाम् अथर्वाय ज्येष्ठपुत्राय प्राह॥**

**अथर्वणे यां प्रवदेत ब्रह्माथर्वा तं पुरोवाचाङ्गिरे ब्रह्मविद्याम्।**

**स भारद्वाजाय सत्यवाहाय प्राह भारद्वाजोऽङ्गिरसे परावराम् ॥**[11]

ब्रह्मणा उपदिष्टा सा विद्या क्रमात् अथर्वा अङ्गीः भारद्वाजः अङ्गिराः शौनकः इत्येवमागता इति श्रूयते। छान्दोग्योपनिषद्यपि ब्रह्मणा विद्योपदेशः दृश्यते। तथाहि- **तद्धैतद्ब्रह्मा प्रजापतय उवाच प्रजापतिर्मनवे मनुः प्रजाभ्यस्तद्धैतदुद्दालकायारुणये ज्येष्ठाय पुत्राय पिता ब्रह्म प्रोवाच**[12] इत्येवम्। एतेन ब्रह्मणा विद्योपदेशः वेदेषु बहुत्र श्रूयते तत्र कतम उपदेशो योगस्य विषये इति प्रश्नः समायाति।

अत्रोच्यते द्विविधो हि योगः उपदिश्यते ज्ञानयोगः कर्मयोगश्च। श्रीमद्भगवद्गीतादिषु अपि द्विविधा निष्ठा स्मर्यते। तथाहि

**लोकेऽस्मिन् द्विविधा निष्ठा पुरा प्रोक्ता मयानघ।**

**ज्ञानयोगेन सांख्यानां कर्मयोगेन योगिनाम्॥**[13]

तथा च

**आरुरुक्षोर्मुनेर्योगं कर्म कारणमुच्यते।**

**योगारूढस्य तस्यैव शमः कारणमुच्यते॥**[14]

समानं गरुडपुराणेऽपि उक्तम्-

**आरुरुक्षुमतीनां तु कर्मज्ञानमुदाहृतम्।**

**आरूढयोगवृक्षाणां ज्ञानं त्यागः परं मतम्॥**[15]

इत्येवं ज्ञानयोगः कर्मयोगः इति द्विविधः मार्गः उपदिष्ट इति स्पष्टम्। मुण्डकोपनिषदि या विद्या उपदिष्टा सा तु ज्ञानविषये, तन्नाम ज्ञानयोगः राजयोगो वा। छान्दोग्योपनिषदि या विद्या उपदिष्टा सा तु कर्मविषये तस्यार्थः कर्मयोगः। सैव परम्परा श्रीमद्भगवद्गीतायामपि उक्ता-

**इमं विवस्वते योगं प्रोक्तवानहमव्ययम्।**

**विवस्वान् मनवे प्राह मनुरिक्ष्वाकवेऽब्रवीत्॥**[16] इति।

द्विविधस्यापि योगस्य उपदेशः ब्रह्मणा हिरण्यगर्भेण वा कृतः इति ज्ञायते। तस्यैव स्मरणं प्रायः महाभारतादिषु कृतं वर्तते। अतो चतुर्मुखब्रह्मा हिरण्यगर्भ एव योगस्य आदिवक्ता इत्यत्र न संशयः।

योगसूत्रस्य प्रणेता महर्षिः पतञ्जलिरेव योगदर्शनस्य प्रवर्तकः इत्यपि बहवः मन्यन्ते। अत्रोच्यते महर्षिणा पतञ्जलिना तु पूर्वप्रचलितस्य योगस्यैव अनुशासनं प्रवर्तनं वा कृतमिति वक्तव्यम्। अपूर्वं नूतनं वा किञ्चित् न तेन उपस्थापितम्। कुत एतत् ज्ञायते इति चेत् योगदर्शनस्य प्रथमसूत्रे एव **अथ योगानुशासनम्**[17] इति अनुशासनशब्दस्य उल्लेखः तेन कृतः। अनुशासनशब्देन इदं ज्ञायते यत् पूर्वं प्रतिपादितस्य योगशास्त्रस्यैव उपदेशः पतञ्जलिना कृतः।

आधुनिककाले तु योगदर्शनस्य आरम्भः पतञ्जलिविरचितेन योगसूत्रेणैव भवति। पतञ्जलिमहर्षेः समयस्तु विक्रमपूर्वं द्वितीयशतकमिति मन्यते। योगसूत्रे चत्वारः पादाः सन्ति- समाधिपादः साधनपादः विभूतिपादः कैवल्यपादः च। समाधिपादे एते विषयाः भवन्ति- समाधिः तद्भेदाश्च, चित्तस्य वृत्तयः। साधनपादे क्रियायोगस्य क्लेशानां तथा क्लेशनिवारणोपायानां, हेयसाधनानां हेयहेतूनां, हानस्य, हानोपायस्य च वर्णनं सन्ति। विभूतिपादे धारणध्यानसमाधीनां प्रतिपादनानन्तरं योगानुष्ठानेन समुत्पन्नानां विभूतीनां प्रतिपादनं कृतमस्ति। अन्तिमे पादे योगाभ्यासेन विविधानां सिद्धीनां विषये उक्त्वा सकलसिद्ध्यपेक्षया कैवल्यस्य प्राधान्यं सूचितमस्ति। अतोऽस्य पादस्यैव कैवल्यमिति अभिधा। पादस्यान्तिमे पुरुषार्थशून्यानां गुणानां प्रतिप्रसवः कैवल्यस्वरूपप्रतिष्ठा वा चितिशक्तिरिति इति सूत्रेण कैवल्यस्य स्वरूपमभिमतम्।

योगसूत्रस्य प्रसिद्धः भाष्यग्रन्थो भवति व्यासभाष्यम्। विद्वद्भिः अयमेव भाष्यग्रन्थः योगसूत्रनिहितार्थस्पष्टीकरणाय प्रामाणिकत्वेन उपयोगित्वेन च स्वीक्रियते। गहनं तथा सरलं भवति इदं भाष्यम्। अस्य भाष्यस्य नैकाः टीकाः सन्ति। तासु प्रसिद्धाः भवन्ति वाचस्पतिमिश्रस्य तत्त्ववैशारदी, विज्ञानभिक्षोः योगवार्तिकमिति। तत्त्ववैशारद्याः उपरि राघवानन्दस्य पातञ्जलयोगरहस्यम् इति टीकाग्रन्थः अस्ति।

योगसूत्रस्य अपि बहूनि व्याख्यानानि प्राप्यन्ते। यथा भोजराजविरचिता भोजवृत्तिः (राजमार्तण्डः), भावगणेशविरचिता वृत्तिः, रामानन्दयतिविरचिता मणिप्रभा, अनन्तपण्डितरचिता योगचन्द्रिका, सदाशिवेन्द्रसरस्वतीकृतः योगसुधाकरः, नागेशभट्ट-विरचिता बाह्यवृत्तिः, ओमानन्दतीर्थप्रणीतः योगप्रदीपः इत्यादीनि।

**निष्कर्षः**

वेदाः, पुरुषार्थाः च भारतीयदर्शनस्य मूलाधाराः सन्ति। मोक्षमार्गे भक्तिज्ञानवैराग्यं च प्रधानानि साधनानि भवन्ति। योगदर्शनं तु प्राचीनं व्यापकं च, हिरण्यगर्भादारभ्य पतञ्जलिना संवर्धितम्। ज्ञानयोगकर्मयोगयोः समन्वयेनैव मोक्षलाभः साध्यते। अतः शास्त्रपरम्परायाः अध्ययनं जीवनस्य सार्थकत्वाय अनिवार्यम्।

**पाद टिप्पणी**:

[1] महाभारतम् – शान्तिपर्व – 168/4श्लोकः

[2] मनुस्मृतिः – द्वितीयोऽध्यायः / 13 श्लोकः

[3] याज्ञवल्क्यसंहिता 12.5 , महाभारत 12.349.65

[4] देवीभागवतम् 5.19.13

[5] योगभास्वती 1.1

[6] महाभारत शान्तिपर्व 339.67.-70

[7] महाभारत 12.342.96

[8] ऋग्वेद 10.121.1

[9] अमरकोश, स्वर्गवर्ग 1.1.17.2.5

[10] मनुसंहिता 1.7। समानः श्लोकः भविष्यपुराणे ब्राह्मपर्वणि तीयाध्यायेऽपि स्मर्यते

[11] मुण्डकोपनिषत् 1.1-2

[12] छान्दोग्योपनिषत् 3.11.4

[13] श्रीमद्भगवद्गीता 3.3

[14] श्रीमद्भगवद्गीता 6.3

[15] गरुडपुराण 1.235.4

[16] श्रीमद्भगवद्गीता 4.1

[17] योगसूत्रं 1.1